# Rajabhih Kritam Shri Krishna Stotram

# રાજભિઃ કૃતં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Rajabhih Kritam Shri Krishna Stotram

File name : rAjabhiHkRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/73/8-16||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

# રાજભિઃ કૃતં શ્રીકૃષ્ણસ્તોત્રમ્

રાજાન ઊચુઃ ।
નમસ્તે દેવદેવેશ પ્રપન્નાર્તિહરાવ્યય ।
પ્રપન્નાન્ પાહિ નઃ કૃષ્ણ નિર્વિણ્ણાન્ ઘોરસંસૃતેઃ ॥ ૮॥

નૈનં નાથાન્વસૂયામો માગધં મધુસૂદન ।
અનુગ્રહો યદ્ભવતો રાજ્ઞાં રાજ્યચ્યુતિર્વિભો ॥ ૯॥

રાજ્યૈશ્વર્યમદોન્નદ્ધો ન શ્રેયો વિન્દતે નૃપઃ ।
ત્વન્માયામોહિતોઽનિત્યા મન્યતે સમ્પદોઽચલાઃ ॥ ૧૦॥

મૃગતૃષ્ણાં યથા બાલા મન્યન્ત ઉદકાશયમ્ ।
એવં વૈકારિકીં માયામયુક્તા વસ્તુ ચક્ષતે ॥ ૧૧॥

વયં પુરા શ્રીમદનષ્ટદૃષ્ટયો
જિગીષયાસ્યા ઇતરેતરસ્પૃધઃ ।
ઘ્નન્તઃ પ્રજાઃ સ્વા અતિનિર્ઘૃણાઃ પ્રભો
મૃત્યું પુરસ્ત્વાવિગણય્ય દુર્મદાઃ ॥ ૧૨॥

ત એવ કૃષ્ણાદ્ય ગભીરરંહસા
દુરન્તવીર્યેણ વિચાલિતાઃ શ્રિયઃ ।
કાલેન તન્વા ભવતોઽનુકમ્પયા
વિનષ્ટદર્પાશ્ચરણૌ સ્મરામ તે ॥ ૧૩॥

અથો ન રાજ્યં મૃગતૃષ્ણિરૂપિતં
દેહેન શશ્વત્પતતા રુજાં ભુવા ।
ઉપાસિતવ્યં સ્પૃહયામહે વિભો
ક્રિયાફલં પ્રેત્ય ચ કર્ણરોચનમ્ ॥ ૧૪॥

તં નઃ સમાદિશોપાયં યેન તે ચરણાબ્જયોઃ ।
સ્મૃતિર્યથા ન વિરમેદપિ સંસરતામિહ ॥ ૧૫॥

કૃષ્ણાય વાસુદેવાય હરયે પરમાત્મને ।
પ્રણતક્લેશનાશાય ગોવિન્દાય નમો નમઃ ॥ ૧૬॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે ઉત્તરાર્ધે
ત્રિસપ્તતિતમાધ્યાયાન્તર્ગતં જરાસન્ધબન્ધનાન્મુક્તૈઃ
રાજભિઃ કૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૭૩/૮-૧૬॥

bhAgavatapurANa . adhyAya 10/73/8-16..

Proofread by PSA Easwaran

*Rajabhih Kritam Shri Krishna Stotram*
pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*